# Shri Sachchidananda Shivabhinava Nrisimha Bharatyashtakam

# શ્રીસચ્ચિદાનન્દશિવાભિનવનૃસિંહભારત્યષ્ટકમ્

## Document Information

Text title : Sachchidananda Shivabhinava Nrisimhabharati Ashtakam

File name : sachchidAnandashivAbhinavanRRisiMhabhAratyaShTakam.itx

Category : deities_misc, gurudev

Location : doc_deities_misc

Author : Shri BharatItirthamahasvAmi

Acknowledge-Permission: Sringeri Math https://www.sringeri.net/

Latest update : May 13, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

May 13, 2025

*sanskritdocuments.org*

# શ્રીસચ્ચિદાનન્દશિવાભિનવનૃસિંહભારત્યષ્ટકમ્

પિઙ્ગલાભિધાનહાયને ગૃહીતજન્મનઃ
સર્વમઙ્ગલાસહાયપાદસેવને રતાન્ ।
શ્રીશિવાભિનવનૃસિંહભારતીગુરૂત્તમાન્
ભાવયામિ ભક્તિપૂર્ણચેતસા નિરન્તરમ્ ॥ ૧॥

શ્રીનૃસિંહગુરુપદાબ્જબમ્ભરાયિતાન્તરાન્
શ્રીસદાશિવેન્દ્રયોગિતુલ્યસિદ્ધિસંયુતાન્ ।
શ્રીશિવાભિનવનૃસિંહભારતીયતીશ્વરાન્
ભાવયામિ ભુક્તિમુક્તિદાયિનો નતાલયે ॥ ૨॥

ધર્મતત્ત્વબોધકાનધર્મનિગ્રહે રતાન્
શર્મદાનતત્પરાનશેષભક્તકોટયે ।
શ્રીશિવાભિનવનૃસિંહભારતીગુરૂત્તમાન્
શીલયામિ સન્તતં શિવેતરાપનુત્તયે ॥ ૩॥

સ્વીયપાદપાંસુપાવિતાખિલક્ષમાતલાન્
સ્વપ્રકાશચિન્નિવિષ્ટમાનસાનનારતમ્ ।
શ્રીશિવાભિનવનૃસિંહભારતીજગદ્ગુરૂન્
સાદરં નમામિ સર્વલોકરક્ષણવ્રતાન્ ॥ ૪॥

વેદશાસ્ત્રસમ્પ્રદાયપાલને ધૃતવ્રતાન્
વિદ્વદાલિગીયમાનપાણ્ડિતીવિભૂષિતાન્ ।
શ્રીશિવાભિનવનૃસિંહભારતીગુરૂત્તમાન્
ચિન્તયામિ શિષ્યહૃત્તમોવિવસ્વતોઽનિશમ્ ॥ ૫॥

દમ્ભદર્પવર્જિતાનશેષલોકવન્દિતાન્
કુમ્ભજન્મનસ્સમસ્તવેદશાસ્ત્રવારિધેઃ ।
શ્રીશિવાભિનવનૃસિંહભારતીયતીશ્વરાન્
સંસ્મરામિ સંયમીન્દ્રસેવ્યપાદપઙ્કજાન્ ॥ ૬॥

ભૂમિપાલવન્દિતાનપૂર્વવાગ્ઝરીયુતાન્
કામિતેષ્ટદાયકાન્ પ્રપન્નલોકપઙ્ક્તયે ।
શ્રીશિવાભિનવનૃસિંહભારતીગુરૂત્તમાન્
ભાવયામિ ભદ્રપૂગદાયિદિવ્યવીક્ષણાન્ ॥ ૭॥

શારદાશશાઙ્કમૌલિવિઘ્નરાજપૂજકાન્
શારદેન્દુતુલ્યકીર્તિશાલિનશ્શિવઙ્કરાન્ ।
શ્રીશિવાભિનવનૃસિંહભારતીજગદ્ગુરૂન્
શીલયામિ શાન્તિદાન્તિમુખ્યસમ્પદાપ્તયે ॥ ૮॥

ઇતિ દક્ષિણામ્નાય-શ્રી-શૃઙ્ગેરી-શારદા-પીઠાધીશ્વર-
જગદ્ગુરુશઙ્કરાચાર્ય-અનન્તશ્રીવિભૂષિત-શ્રીભારતીતીર્થ-
મહાસ્વામિવિરચિત-શ્રી-સચ્ચિદાનન્દ-શિવાભિનવ-
નૃસિંહ-ભારત્યષ્ટકં સમ્પૂર્ણમ્ ।

*Shri Sachchidananda Shivabhinava Nrisimha Bharatyashtakam*

pdf was typeset on May 13, 2025

Please send corrections to *sanskrit@cheerful.com*